# ॥ तैत्तिरीयोपनिषत्॥

## ॥ आनन्दवल्ली॥

॥ हरिः ओम्॥

सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा विद्विषावहै॥

ॐ शान्तिः शान्तिः शान्तिः।

ब्रह्मविदाप्नोति परम्। तदेषाऽभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान्थ्सह। ब्रह्मणा विपश्चितेति। तस्माद्वा एतस्मादात्मन आकाशस्संभूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यःपृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात्पुरुषः। स वा एष पुरुषोऽन्नरसमयः। तस्येदमेव शिरः। अयं दक्षिणःपक्षः। अयमुत्तरःपक्षः। अयमात्मा। इदं पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥ १॥

अन्नाद्वै प्रजाःप्रजायन्ते। याःकाश्च पृथिवीꣴश्रिताः। अथो अन्नेनैव जीवन्ति। अथैनदपियन्त्यन्ततः। अन्नꣳहि भूतानां ज्येष्ठम्। तस्मात् सर्वौषधमुच्यते। सर्वं वै तेऽन्नमाप्नुवन्ति। येऽन्नं ब्रह्मोपासते। अन्नꣳहि भूतानां ज्येष्ठम्। तस्मात् सर्वौषधमुच्यते। अन्नाद्भूतानि जायन्ते। जातान्यन्नेन वर्धन्ते। अद्यतेऽत्ति च भूतानि। तस्मादन्नं तदुच्यत इति। तस्माद्वा एतस्मादन्नरसमयात्। अन्योऽन्तर आत्मा प्राणमयः। तेनैष पूर्णः।

स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य प्राण एव शिरः। व्यानो दक्षिणःपक्षः। अपान उत्तरःपक्षः। आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥ २॥

प्राणं देवा अनुप्राणन्ति। मनुष्याःपशवश्चये। प्रणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यते। सर्वमेव त आयुर्यन्ति। ये प्राणम् ब्रह्मोपासते। प्रणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यत इति। तस्यैष एव शारीर आत्मा। यःपूर्वस्य। तस्माद्वा एतस्मात् प्राणमयात्। अन्योऽन्तर आत्मा मनोमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य यजुरेव शिरः। ऋग्दक्षिणःपक्षः। समोत्तरःपक्षः। आदेश आत्मा। अथर्वाङ्गिरसःपुच्छं प्रतिष्ठा। तदप्येष श्लोक भवति॥ ३॥

यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कदाचनेति। तस्यैष एव शारीर आत्मा। यःपूर्वस्य। तस्माद्वा एतस्मान्मनोमयात्। अन्योऽन्तर आत्मा विज्ञानमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणःपक्षः। सत्यमुत्तरःपक्षः। योग आत्मा। महःपुच्छं प्रतिष्ठा। तदप्येष श्लोको भवति॥ ४॥

विज्ञानं यज्ञं तनुते। कर्माणि तनुतेऽपि च। विज्ञानं देवास्सर्वे। ब्रह्म ज्येष्ठमुपासते। विज्ञानं ब्रह्म चेद्वेद। तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वा। सर्वान् कामान् शमश्नुत इति।

तस्यैष एव शारी॑र आ॒त्मा। य॑ः पू॒र्व॑स्य। तस्माद्वा एतस्माद्विज्ञा॒नम॑यात्। अन्योऽन्तर

आत्मा॑ऽऽनन्द॒मयः। ते॑नैष पू॒र्णः। स वा एष पुरुषवि॑ध ए॒व। तस्य पुरु॑षवि॒धताम्।

अन्वय॑ं पुरु॒षविधः। तस्य प्रिय॑मे॒व शिरः। मोदो द॑क्षिणः प॒क्षः। प्रमोद उत्त॑रः प॒क्षः।

आन॑न्द आ॒त्मा। ब्रह्म पुच्छ॑ं प्रति॒ष्ठा। तदप्येष श्लोको॑ भ॒वति॥ ५॥

अस॑न्ने॒व स॑ भवति। अस॒द्ब्रह्मेति॒ वेद॒ चेत्। अस्ति ब्रह्मेति॑ चेद्वे॒द। सन्तमेनं ततो वि॑दुरि॒ति।

तस्यैष एव शारी॑र आ॒त्मा। य॑ः पू॒र्व॑स्य। अथातो॑ऽनुप्र॒श्नाः। उ॒ताविद्वा॒नमुं लो॒कं प्रेत्य॑।

कश्चन ग॑च्छ॒ती३। आहो॑ वि॒द्वान॒मुं लो॒कं प्रेत्य॑। कश्चि॒त्सम॑श्नु॒ता३उ॒। सो॑ऽकामयत।

ब॒हु॒स्यां॒ प्रजाये॒येति॑। स तपो॑ऽतप्यत। स तप॑स्त॒प्त्वा। इ॒दꣳसर्व॑मसृजत। यदि॒दं कि॑ञ्च।

तत्सृ॒ष्ट्वा। तदे॒वानु॒प्रावि॑शत्। तद॑नु॒प्रवि॑श्य॑। सच्च॒ त्यच्चा॑भवत्। नि॒रुक्तं॑ चा नि॑रुक्तं च।

नि॒लय॑नं॒ चा नि॑लयनं च। वि॒ज्ञानं॒ चा वि॑ज्ञानं च। सत्यं चा नृतं च स॑त्यम॒भवत्।

यदि॑दं कि॒ञ्च। तत्सत्यमि॑त्या॒चक्षते। तदप्येष श्लोको॑ भ॒वति॥ ६॥

अस॒द्वा इ॒दमग्र॑ आसीत्। तत॒ो वै सद॑जायत। तदात्मान॑ꣳ स्वय॑मकु॒रुत। तस्मात्तत्सुकृतमुच्य॑त

इ॒ति। यद्वै॑ तत्सु॒कृ॒तम्। र॑सो वै॒ सः। रसꣳ ह्येवायं लब्ध्वाऽऽन॑न्दी भ॒वति। को ह्येवान्या॑॑त्

कः प्राण्यात्। यदेष आकाश आन॑न्दो न॒ स्यात्। एष ह्येवान॑न्दया॒ति। य॒दा ह्येवै॑ष॒

एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभ्यं प्रति॑ष्ठां वि॒न्दते। अथ सोऽभ्यं ग॑तो भ॒वति।

य॒दा ह्येवै॑ष॒ एतस्मिन्नुदरमन्त॑रं कु॒रुते। अथ तस्य भ॑यं भवति। तत्त्वेव भयं विदुषोऽम॑न्वान॒स्य।

तदप्येष श्लोको॑ भ॒वति॥ ७॥

भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः। भीषाऽस्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चम इति।

सैषाऽऽनन्दस्य मीमाꣳसा भवति। युवा स्यात्साधु युवाध्यायकः। आशिष्ठो द्रढिष्ठो बलिष्ठः।

तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्। स एको मानुष आनन्दः। ते ये शतं मानुषा

आनन्दाः। स एको मनुष्यगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं

मनुष्यगन्धर्वाणामानन्दाः। स एको देवगन्धर्वाणामानन्दः। श्रोत्रियस्य चाकामहतस्य।

ते ये शतं देवगन्धर्वाणामानन्दाः। स एकः पितृणां चिरलोकलोकानामानन्दः। श्रोत्रियस्य

चाकामहतस्य। ते ये शतं पितृणां चिरलोकलोकानामानन्दाः। स एक आजानजानां

देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतमाजानजानां देवानामानन्दाः।

स एकः कर्मदेवानां देवानामानन्दः। ये कर्मणा देवानपियन्ति। श्रोत्रियस्य चाकामहतस्य।

ते ये शतं कर्मदेवानां देवानामानन्दाः। स एको देवानामानन्दः। श्रोत्रियस्य चाकामहतस्य।

ते ये शतं देवानामानन्दाः। स एक इन्द्रस्यानन्दः। श्रोत्रियस्य चाकामहतस्य। ते य

शतमिन्द्रस्यानन्दाः। स एको बृहस्पतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं

बृहस्पतेरानन्दाः। स एकः प्रजपतेरानन्दः। श्रोत्रियस्य चाकामहतस्य। ते ये शतं

प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्य। स यश्चायं पुरुषे।

यश्चासावादित्ये। स एकः। स य एवंवित्। अस्माल्लोकात्प्रेत्य। एतमन्नमयमात्मानमुपसंक्रामति।

एतं प्राणमयमात्मानमुपसंक्रामति। एतं मनोमयमात्मानमुपसंक्रामति। एतं

विज्ञानमयमात्मानमुपसंक्रामति। एतमानन्दमयमात्मानमुपसंक्रामति। तदप्येष श्लोको

भवति॥ ८॥

यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चनेति।

एतꣳह वा व न तपति। किमहꣳसाधु नाकरवम्। किमहं पापमकरवमिति। स य एवं

विद्वानेते आत्मानꣳस्पृणुते। उभे ह्येवैष एते आत्मानꣳस्पृणुते। य एवं वेद। इत्युपनिषत्॥ ९॥

॥ हरिः ओ३म्॥

**॥ इति आनन्दवल्ली॥**